"आगमेनोपभोगेन नष्टं भाव्यमतोऽन्यथा।
पञ्चबन्धो दमस्तस्य राज्ञे तेनाविभाविते"॥

आगमेन रिक्थक्रयादिना उपभोगेन च मदीयमिदं द्रव्यं तच्चैवं नष्टमपहृतं वेत्यपि भाव्यं साधनीयं तत्स्वामिना अतोऽन्यथा तेन स्वामिना अविभाविते पञ्चबन्धो नष्टद्रव्यस्य पञ्चमांशो दमो नाष्टिकेन राज्ञे देयः ॥ * ॥ अत्रैवायं क्रमः। पूर्व्वस्वामी नष्टमात्मीयं साधयेत् ततः क्रेता चौर्य्यपरिहारार्थं मूल्यलाभाय च विक्रेतारमानयेत्। अथानेतुं न शक्नोति तदात्मदोषपरिहाराय क्रयं शोधयित्वा नाष्टिकस्य समर्पयेदिति ॥ * ॥

तस्करस्य प्रच्छादकं प्रत्याह।
"हृतं प्रणष्टं यो द्रव्यं परहस्तादवाप्नुयात्।
अनिवेद्य नृपे दण्ड्यः स तु षण्णवतिं पणान्"॥

हृतं प्रणष्टं वा चौरादिहस्तस्थं द्रव्यमनेन मदीयं द्रव्यमपहृतमिति नृपस्यानिवेद्यैव दर्पादिना यो गृह्णात्यसौ षड्नवतिपणान् दण्डनीयः। तस्करप्रच्छादकत्वेन दुष्टत्वात् ॥ * ॥

राजपुरुषानीतं प्रत्याह।
"शौल्किकैः स्थानपालैर्व्वा नष्टापहृतमाहृतं।
अर्व्वाक् सम्वत्सरात् स्वामी हरेत परतो नृपः"॥

यदा तु शुल्काधिकारिभिः स्थानरक्षिभिर्व्वा नष्टमपहृतं द्रव्यं राजपार्श्वं प्रत्यानीतं तदा संवत्सरादर्व्वाक्प्राप्तश्चेत् नाष्टिकस्तद्द्रव्यमवाप्नुयात्। ऊर्द्धं पुनः संवत्सराद्राजा गृह्णीयात्। स्वपुरुषानीतञ्च द्रव्यं जनसमूहेषूद्घोष्य यावत् संवत्सरं राज्ञा रक्षणीयं। यथाह गौतमः। प्रणष्टमस्वामिकमधिगम्य राज्ञे प्रब्रूयुर्विख्याप्य सम्वत्सरं राज्ञा रक्ष्यमिति। यत् पुनर्मनुना विध्यन्तरमुक्तं—

"प्रणष्टस्वामिकं द्रव्यं राजा त्र्यब्दं निधापयेत्।
अर्व्वाक् त्र्यब्दात् हरेत् स्वामी परतो नृपतिर्हरेत्"॥

इति॥ तच्छ्रुतवृत्तसम्पन्नब्राह्मणविषयं। रक्षणनिमित्तं षड्भागादिग्रहणञ्च तेनैवोक्तं।

"आददीताथ षड्भागं प्रणष्टाधिगतान्नृपः।
दशमं द्वादशं वापि सतां धर्म्ममनुस्मरन्"॥ इति।

तृतीयद्वितीयप्रथमवत्सरेषु यथाक्रमं षष्ठादयो भागा वेदितव्याः। प्रपञ्चितश्चैतत् पुरस्तात् ॥ * ॥ मनूक्तषड्भागादिग्रहणस्य द्रव्यविशेषे अपवादमाह।

"पणानेकशफे दद्यात् चतुरः पञ्च मानुषे।
महिषोष्ट्रगवां द्वौ द्वौ पादं पादमजाविके"॥

एकशफे अश्वादौ प्रणष्टाधिगते तत्स्वामी राज्ञे रक्षणनिमित्तं चतुरः पणान् दद्यात्। मानुषे मनुष्यजातीये द्रव्ये पञ्च पणान्। महिषोष्ट्रगवां रक्षणनिमित्तं प्रत्येकं द्वौ द्वौ पणौ। अजाविके पुनः प्रत्येकं पादं पादं दद्यादिति सर्व्वत्रानुषज्यते। अजाविकमिति समासनिर्द्देशेऽपि पादं पादमिति वीप्सावलात् प्रत्येकं सम्बन्धो गम्यते। इत्यस्वामिकविक्रयप्रकरणं। इति मिताक्षरायां व्यवहाराध्यायः॥

अस्वामी, [न्] त्रि, (न स्वामि अधिकारी नञ्समासः।) स्वामिभिन्नः। यथा। बृहस्पतिः।
"अस्वामिना तु यद्भुक्तं गृहक्षेत्रापणादिकं।
सुहृद्बन्धुसकुल्यस्य न तद्भोगेन हीयते"॥
इति दायतत्त्वं॥

अस्वाम्यं, क्ली, (न स्वाम्यम्। नञ्समासः।) स्वामित्वाभावः। यथा देवलः।
"अस्वाम्यं हि भवेदेषां निर्द्दोषे पितरि स्थिते"।
इति दायतत्त्वं॥

अस्वास्थ्यं, क्ली, सुस्थत्वाभावः। सुस्थताराहित्यं। स्वास्थ्यस्याभावः अस्वास्थ्यमित्यव्ययीभावसमासनिष्पन्नं॥ (यथा शिशुपालवधे।
"विमृह्य चक्रे नमुचिद्विषा बली
य इत्थमस्वास्थ्यमहर्द्दिवन्दिवः"॥
भुङ्क्ते स्वास्थ्यमुपैति च, इति ग्रहणीरोगेऽभिहितं माधवकरेण संगृहीतञ्च। अत्र हि अभुक्तेऽस्वास्थ्यमिति तात्पर्य्यं॥)

अह इ क भासे। (उभं-चुरां-अकं-सेट्।) दीप्तिरिति यावत्। इति कविकल्पद्रुमः॥ इ क अंहयति। भासो दीप्तिः। इति दुर्गादासः॥

अह इ ङ गतौ। (भ्वादिं-आत्मं-सकं-सेट्।) इति कविकल्पद्रुमः॥ इ अंह्यते। ङ अंहते। इति दुर्गादासः॥

अह, व्य, प्रशंसा। क्षेपणं। नियोगः। विनिग्रहः। इति मेदिनी॥

अहं, त्रि, अस्मद्शब्दस्य प्रथमान्तस्य रूपं। आमि इति भाषा। यथा आह्निकतत्त्वं,—
'अहं देवो न चान्योऽस्मि ब्रह्मैवास्मि न शोकभाक्।
सच्चिदानन्दरूपोऽहं नित्यमुक्तस्वभाववान्"॥
(तथा च रघुवंशे १। ६८।
"सोऽहमिज्या विशुद्धात्मा प्रजालोपनिमीलितः")

अहंयुः, त्रि, (अहंमस्यास्तीति अहंशब्दात् "अहंशुभयोर्युस्" इति युस्।) अहङ्कारयुक्तः। गर्व्वान्वितः। तत्पर्य्यायः। अहङ्कारवान् २। इत्यमरः॥ ("अहंयुनाथ क्षितिपः शुभंयुः"। इति भट्टिः।)

अहः [न्], क्ली, दिवा। इत्यमरः॥ [टीका॥

अहःपतिः, पुं, (अह्नः पतिः।) सूर्य्यः। इत्यमर-

अहङ्कारः, पुं, (अहमिति ज्ञानं क्रियतेऽनेन। अहं+कृ+घञ्।) अहङ्कृतिः। तत्पर्य्यायः। गर्व्वः २ अभिमानः ३ इत्यमरः॥ पुराणमते स त्रिविधः। सात्त्विकः १ राजसः २ तामसश्च ३। सात्त्विकाहङ्कारात् इन्द्रियाधिष्ठातारो देवा मनश्च जातं। राजसाहङ्कारात् दशेन्द्रियाणि जातानि। तामसाहङ्कारात् सूक्ष्मपञ्चभूतानि जातानि। वेदान्तमते अभिमानात्मिकान्तःकरणवृत्तिः॥ अहमित्यभिमानः। स च शरीरादिविषयको मिथ्याज्ञानमुच्यते। इति गोतमसूत्रवृत्तिः। "अहमित्यव्ययं तस्य करणं। अहमिति किरति अनेति वा अहङ्कारः। करोतेः किरतेर्व्वा घञ्। कारप्रत्यय इत्यन्ये"। इत्यमरटीकायां भरतः। मदः ४ स्मयः ५ अवलेपः ६ दर्पः ७। इति जटाधरः। अहङ्कृतिः ८ उद्धतमनस्कत्वं ९। मानः १० चित्तसमुन्नतिः ११। यथा।
"गर्व्वोमदोऽभिमानः स्यादहङ्कारस्त्वहङ्कृतिः।
स्यादुद्धतमनस्कत्वे मानचित्तसमुन्नतिः॥
अहङ्कारस्य पर्य्याय इति केचित् प्रचक्षते"॥
इति शब्दरत्नावली॥ (अहङ्कारस्याश्रय आत्मा। यथा, भाषापरिच्छेदे।
"अहङ्कारस्याश्रयोऽयं मनोमात्रस्य गोचरः"।
अहङ्कारतत्त्वं। यथाह मनौ, १। १४।
"मनसश्चाप्यहङ्कारमभिमन्तारमीश्वरम्"।
गर्व्वोन्नत्यम्। यदुक्तं।
"अहङ्कारश्च सर्व्वेषां पापवीजममङ्गलम्।
ब्रह्माण्डेषु च सर्व्वेषां गर्व्वपर्य्यन्तमुन्नतिः"॥
स च द्विविधः, विशेषरूपः सामान्यरूपश्चेति। तत्रायमहं एतस्य पुत्र इत्येवं व्यक्तमभिमन्यमानो विशेषरूपो व्यष्ट्यहङ्कारः। अस्मीत्येतावन्मात्रमभिमन्यमानः सामान्यरूपः समष्ट्यहङ्कारः। स च हिरण्यगर्भो महान् आत्मेति च सर्व्वानुस्यूतत्वादुच्यते। अहमभिमानरूपो योऽहङ्कारः स सर्व्वसाधारणः। आरोपितगुणैरात्मनो महत्त्वाभिमानः। अहमेव श्रेष्ठ इति दुरभिमानः। महाकुलप्रसूतोऽहं महतां शिष्यो नास्ति द्वितीयो मत्सम इत्यभिमानः। आत्मश्लाघनाभावेऽपि मनसि प्रादुर्भूतोऽहं सर्व्वोत्कृष्ट इति गर्व्वः।)

अहङ्कारवान्, त्रि, (अहङ्कारो विद्यतेऽस्य। अहङ्कार+मतुप्। मस्य वः।) गर्व्वान्वितः। इत्यमरः॥ तत्पर्य्यायः। अहंयुः २। इत्यमरः॥ अहङ्कारान्वितः ३। इति शब्दरत्नावली। गर्व्वितः ४। इति जटाधरः॥

अहङ्कारी, [न्] त्रि, गर्व्वयुक्तः। अहङ्कारो विद्यतेयस्येति अस्त्यर्थे णिनूप्रत्ययेन निष्पन्नः। अभिमानी। गर्व्वान्वितः॥ (दशरूपके॥
"धीरोद्धतस्त्वहङ्कारी चलश्चण्डो विकत्थनः"।)

अहङ्कृतिः, स्त्री, (अहम्+कृ+क्तिन्।) अहङ्कारः। गर्व्वः। इति शब्दरत्नावली॥ (यथा पञ्चतन्त्रे॥
"युध्यतेऽहङ्कृतिं कृत्वा दुर्ब्बलो यो बलीयसा"।)

अहतं, क्ली, (हन्+क्त। ततो नञ्समासः।) नवाम्बरं। नूतनवस्त्रं। इति हलायुधशब्दरत्नावल्यौ॥ (अहतलक्षणं यथा महाभारते,—
"ईषद्धौतं नवं श्वेतं सदशं यन्नधारितम्।
अहतं तद्विजानीयात् पावनं सर्व्वकर्म्मसु"॥
"अहतैश्चैव वासोभिर्माल्यैरुच्चावचैरपि"। इति॥
"अहतानि च वासांसि रचञ्च शुभलक्षणम्"।
इति रामायणे। अनाहते, त्रि,॥

अहमहमिका, स्त्री, (अहमहं शब्दोऽस्यत्र, वीप्सायां द्वित्वम्। व्रीह्यादित्वात् ठन्। ततष्टाप्।) परस्पराहङ्कारः। इत्यमरः। परस्परं परमपेक्ष्यापरस्यापरमपेक्ष्य परस्य योऽहङ्कारोऽहमेव श्रेष्ठोऽहमेव श्रेष्ठ इति मानः। इति भरतः आमि वड़ आमि वड़ वलिया परस्पर अहङ्कार इति भाषा॥ (यथा पञ्चतन्त्रे,—